# ब्रह्मपुराणे वर्णितं आदित्यमाहात्म्योपरि ऋग्वेद-प्रभावः

**शीतांशु त्रिपाठी**

तत्र प्रथमं –

**''पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मतम्।''**

इत्यनेन वचनेन पुराणानां प्राचीनता सर्वतोभावेन सिद्ध्यति। ऐतिहासिकदष्ट्या पुराणानां अत्यधिकं महत्त्वं विद्यते। यतो हि ''इतिहासपुराणाभ्यां वेदं समुपबंहयेत्'' इति। विश्वसाहित्येषु पुराणानि एव प्रथमतया विश्वस्य समग्रमानवानां इतिहासलेखनं सूचयन्ति। मानवानां अन्तश्चेतनायाः प्रेरणायाश्च आधारस्तम्भाः वेदाः समभवन् तथा च वेदानां सम्यग् ज्ञानार्थम् इतिहासपुराणानां आवश्यकता महती अनुभूता, अतएव तद् ज्ञानं विना वेदार्थं नावगच्छति।

तत्र भगवतो विष्णोः रुद्रस्य च यथोपासना सनातनी वर्तते, तथैव सूर्यस्य अथवा आदित्यस्योपासना पि प्राचीना। यतो हि संहिताषु विविधस्थलेषु आदित्यस्तुतिर्दश्यते। यथा – ''यो सावादित्यः सो सावहम्'' यजु (४०.१७) मन्त्रे स्मिन् यो यम् आदित्यपुरुषो स्ति सो हमित्युक्तम्। सविता देवो यं सुवर्णरथसंस्थितः परिभ्रमति सर्वाणि भुवनानि। यथोक्तं (हिरण्येन सविता रथेन देवो याति भुवनानि पश्यन्''यजु० –३३.१)

ब्रह्मपुराणे पि सूर्यस्य स्वरूपविवेचनं धार्मिकभावनया तस्यामेव भाषायां तथैव कतं अस्ति, यद् वैज्ञानिकदष्ट्या पूर्णरूपेण सत्यं सिद्ध्यति। यतो हि नवग्रहाणां उपग्रहादिनाञ्च पिण्डानां समुत्पत्तिः सूर्यादेव बभूव। एवञ्चान्ते ते सर्वे पि पुनः सूर्ये संल्लीनाः भविष्यन्ति इति वर्णितम्। एतद् अवस्थाद्वयं सष्टेः प्रलयस्य च मन्यते। वैज्ञानिका अपि एवमेव वदन्ति, यत् संसारस्य जगतो वा सर्वे पदार्थाः प्राणिनश्च सूर्यप्रभावाद् विभिन्नस्वरूपेषु विविधवर्णेषु च दश्यन्ते। यदा सूर्यस्य प्रभाः तेभ्यः पदार्थेभ्यः निस्सरन्ति स्म, तथा च शरीराणि प्राकतिकतापेन, कत्रिमतापेन वा दग्धानि भवन्ति, तदा तान्येव भस्मरूपेण परिवर्तितानि भवन्ति। यच्च समेषां भौतिकपदार्थानां मूलमस्ति। एवं प्रत्यक्षं दश्यमानं जगदिदं निश्चितमेव सूर्यात् प्रादुर्भूतं अस्ति, अपि च तस्मिन्नेव लीयते।

अस्यां स्थितौ सर्वेषां पदार्थानां देवानाञ्च मूलकारणं आदिकारणं वा साक्षात् देवः सूर्य एव प्रतीयते, अत्र नास्ति काचिद् अतिशयोक्तिः। एषां समेषां सिद्धान्तानां मूलं ऋकसंहितायां विद्यते, अतएव ब्रह्मपुराणे विविधस्थलेषु सूर्यस्य, सवितुः आदित्यस्य च सूक्तानामेव वर्णनं प्राप्यते।

आदित्यमाहात्म्यवर्णनप्रसंगे गहस्थानां, ब्रह्मचारिणां, वानप्रस्थानां, सन्यासिनाञ्च मोक्षप्राप्तिविषये निरूपितं कः कं देवं उपासयेत ? कं देवं देवाधिदेवं मन्येत ? पितगणस्य च पिता कः इति मन्येत ? – एतेषां समस्तानां प्रश्नानां समाधानं अत्रैव लभ्यते।

ब्रह्मपुराणानुसारेण सूर्ये उदिते सत्येव जगदिदं तमोरहितं भवति, अतो स्मात् श्रेष्ठो नास्ति कश्चिद् देवः। अर्थात् अयमेव परात्परो देव इति।[१] यतो हि स्वमहिम्ना तेजसा वा सूर्यः आकाशत्रयं, पथिवीत्रयम्, अग्निं, वायुम् अंतरिक्षञ्च सर्वं व्याप्नोति प्रकाशयति च्।[२] ब्रह्मपुराणे पथिवीत्रयस्य उल्लेखो न प्राप्यते एवञ्च ऋग्वेदे पि, अतः पथिवीत्रयस्य विवरणम् अधिकं न लभ्यते। सर्वप्रकाशके भास्करे उदिते सत्येव सर्वमपि नक्षत्रमण्डलं तेजोविरहितं चौरवत् निलीयते।[३] देवो यम् आद्यन्तरहितः शाश्वत अव्ययश्च स्वरश्मिभि अत्यन्तमेव तीक्ष्णः प्रकाशवान् भूत्वा लोकत्रयं प्रकाशयति तापयति च।[४] ज्योतिपिण्डस्वरूपेण महत्तेजसा प्रतिष्ठितो यं सूर्यो देवः सर्वश्रेष्ठ अन्नप्रदायकश्च आकाशोपरि विराजितः आकाशात्मक एव वर्तते।[५] कल्याणस्वरूपात्मकाः स्वर्ण–रथस्थाः प्रकाशयुक्तमार्गेण गमनशीलाः स्तुतियोग्याः सूर्यस्य अश्वा आकाशस्य पष्ठं आरूह्य तस्मिन्नेव दिवसे आकाशं पथिवीं च परिभ्रमन्ति।[६] सर्वदेवमयः तपनानाञ्च परमश्रेष्ठो यमेव संपूर्णजगतां स्वामी नाथो वा विद्यते।[७] केवलं सूर्य एव जगत उद्भवे समर्थः। स एव स्वनियमैः संपूर्णं भुवनं प्रकाशयति शास्ति च।[८] किरणानां स एव वर्षणं करोति।[९] आकाशं सर्वलोकांश्च धारयन् प्राणिनः प्रकाशेन वष्ट्या च पालयन् मेधावी देवो यं सविता सुवर्णकवचं धारयन् स्वतेजसा संसारं परिपूरयति।[१०] अयमेव धाता, अयमेव विधाता, अयमेव रक्षकः, सर्वथा अक्षयश्च।[११] नित्यं संसारं स्वकर्मणि प्रवत्तं विधाय अयमेव सूर्यः जगतः उत्पत्तौ स्वबाहून् प्रसारयति।[१२] सर्गकाले संपूर्णमपि जगत आदित्यप्रसूतं भवति। तथा च प्रलयकाले सूर्ये एव निलीनं भवति।[१३] यतो हि स एव लोकत्रयस्य मूलभूतः।[१४] स एव सद्वरेण्यः सन् स्वरश्मिभिः सुसंगतिं कुर्वन् रात्रिं उभयतो व्याप्नोति।[१५] अयं ज्ञाता समेषां कल्याणानां[१६] अयमेव ऋतूनां विभाजनं कुर्वन् उत्तरायणं दक्षिणायनं च स्पष्टं करोति। वसंततौ कपिलवर्णं, ग्रीष्मतौ सुवर्णवर्णं, वर्षतौ श्वेतवर्णं, शरत्काले पाण्डुवर्णं च विभर्ति।[१७] तथा हेमंते अयं सविता ताम्रवर्णं, शिशिरे लोहितवर्णं धारयति।[१८]

ब्रह्मरूपः अक्षयः नित्यस्वरूपश्च वर्तते। अयमेव चतुर्दशानां लोकानां सष्टिं प्रजासजनं करोति, किन्तु स्वयं अव्यक्तमेव प्रचलति, द्वादशरूपेषु आदित्यरूपे अयमुत्पन्नः [१९] इमे इन्द्र–धात–पर्जन्य–त्वष्टन्–पूषन्–अर्यमन्–भग–विवस्वन्–विष्णु–अंशुमन्–वरुण–मित्रादयः सन्ति।[२०]

**इन्द्रः** देवानां राज्ञः पदे स्थितः शत्रुं नाशयति।[२१] सूर्यरूपे विद्यमानः इन्द्रः अहिंसकरूपेण सर्वैः सह संबद्धः।[२२]

**धाता** प्रजापतिपदे स्थित्वा विविधानां प्रजानां सर्जनं करोति।[२३]

**पर्जन्यः** जलवष्टिकारकः अयं जलवष्टिकर उदारचेताः गर्जननिपुणः वनस्पतिषु गर्भं स्थापयति।[२४] अयं वर्षामाध्यमेन पालनं करोति।[२५] औषधीनां कते जलं बिभर्ति। प्राणिनां आत्मा एतस्मिनेववसति।[२६] मेघेषु स्थितो भूत्वा सूर्यो यं स्वकिरणैः जलवष्टिं करोति।[२७]

**त्वष्टन्** समस्तेषु वनस्पतिषु औषधिषु च स्थितो यं सर्वत्र सर्वं व्याप्नोति।[२८] अयं धन– प्रदाता[२९] तथा च आश्रयप्रदातास्ति।[३०]

**पूषन्** अन्नं ददाति[३१] लोभं दूरीकत्य हृदये कठोरतां नाशयति।[३२] अयं उदरपूर्तिं करोति एवं च बलं वर्धयति।[३३] पापवद्धिकारकं क्रोधं समापयति।[३४] अन्नेषु स्थितः प्रजापोषणं करोति।[३५]

**अर्यमन्** वायुसंसरणकारकेषु देवेषु समाश्रितो भवति।[३६] हिंसकपापिनां क्रोधं व्यर्थं करोति।[३७]

**भग** भूतेषु अवस्थितः भवति[३८] अनेन सर्वाणि उपभोग्यानि धनानि काङ्क्षन्ते,[३९] अयं श्रेष्ठः नेता, सत्यवान्, धनवान् च।[४०]

**विवस्वन्** अग्नौ प्रज्जवलितः सन् शरीरधारिषु अन्नपाचनं करोति।[४१]

**विष्णुः** देवानां शत्रून् नाशयति नित्यं उद्भवति।[४२] अयं श्रेष्ठः बलं विभर्ति, अंधकारं लोपयति।[४३] अयं रणक्षेत्रे दस्युमायां विनाशयति[४४] संग्रामे अनेकरूपाणि धारयति।[४५]

**अंशुमन्** वायौ प्रतिष्ठितः सन् प्रजाम् आह्लादयति।[४६]

**वरुणः** जले अवस्थितः सन् नित्यं प्रजाः पोषयति।[४७] अयं पार्थिवानां दिव्यजलानां स्वामी। मेघः एतस्य प्रेरणयैव जलं रचयति।[४८]

**मित्रं** लोके हितसंपादनाय चन्द्रे सरिति स्थितो भवति[४९] तथा च वर्षा माध्यमेन अन्नं धनं कीर्तिं च प्रददाति।[५०] अयमेव स्वमहत्त्वेन आकाशं वशीकरोति।[५१]

यदि इमे आदित्याः सुष्ठु अवलोकनीयाः स्युः तथा च वैज्ञानिकदष्ट्या सूर्यगुणानां अध्ययनं क्रियेत् तदा स्पष्टं भवति यत् इमे आदित्याः

द्वादशमासानां प्रतीकभूताः भवितुं शक्नुवन्ति। एतेषु सम्मलिताः गुणाः सूर्यगुणानां प्रक्रियानां निर्देशनं कुर्वन्ति। ब्रह्मपुराणे प्रतीकछायासु आध्यात्म–दर्शन–धर्मशास्त्र–भूगोलादीनां ज्ञानानां रहस्यानि निगूहितानि। इदं सत्यं वर्तते। इदं अस्माकं सांस्कतिकं स्वरूपं इमानि पुराणानि अक्षुण्णतया धारयन्ति। अतः ब्रह्मपुराणस्य अध्ययन–अध्यापन–शोधादिविषया एव सांस्कतिकाधारं दढं करिष्यन्ति।

*(अतिथि व्याख्याता)*
*संस्कत विभाग*
*डॉ. हरीसिंहगौरविश्वविद्यालयः*
*सागर (म.प्र.) ४७० ००३*

## संदर्भ-सूची

[1] उद्यन्तेवैष कुरुते जगद्वितिमिरं करैः।
नातःपरतरो देवः कश्चिदन्यो द्विजोत्तमा।। (ब्रह्मपुराण–२२.१.७)
[2] त्रिरन्तरिक्षं सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना।
तिस्रो दिवः पथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना।। (ऋग्वेद–४.५३.५)
[3] अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्व चक्षसे।। (ऋग.–१.५०.२)
[4] अनादिनिधनो ह्येष पुरुष : शाश्वतो व्ययः।
तापयत्येष त्रींल्लोकान् भवन रश्मिभिरूल्वणः।। (ब्र० २२.१.८)
[5] विभ्राड् बहत्सुभतं वाजसातमं धर्मन्दिवो धरूणे सत्यमर्पितम्।
अमित्रहा वत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा।। (ऋग०–१०.१७०.२)
[6] भद्रा अश्वाः हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः।।
नमम्नन्तो दिव आ पष्ठमस्थुः परि द्यावपथिवी यन्ति सद्यः।। (ऋग०–१.११५.३)
[7] सर्व्वदेवमयो ह्येष तपतां तपनो वरः।
सर्व्वस्य जगतो नाथः सर्व्वसाक्षी जगत्पतिः।। (ब्र० –२२.१.६)
[8] उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवति देव यामभिः।
उतेदं विश्वं भुवनं वि राजसि श्यावाश्वस्ते सवितः स्तोम मानशे।। (ऋग०–५.८१.५)
[9] संक्षिपत्येष भूतानि तथा विसजते पुनः।
एष भाति तपत्येष वर्षत्येष गभस्तिभिः।। (ब्र० २२.१२.१०)
[10] दिवो धर्त्ता भुवनस्य प्रजापतिः विशङ्गं द्रापिं प्रति मुञ्चते कविः।
विचक्षणः प्रथयन्नापणन्नुर्वजीजनत्सविता सुम्नमुक्थ्यम्।। (ऋग०–४.५३.२)

[११] एष धाता विधाता च भूतादिर्भूतभावनः।
न ह्येष क्षयमायाति नित्यमक्षयमण्डलः।। (ब्र० –२२.१.११)
[१२] आप्रा रजांति दिव्यानि पार्थिवा श्लोकं देवः कणुते स्वाय धर्मणे।
प्र बाहू अस्राक्सविता सवीमनि निवेशययन्प्रसुवन्नक्तुभिर्जगत्।। (ऋग० –४.५३.३)
[१३] सर्गकाले जगत् कतस्नमादित्यात् सम्प्रसूयते।
प्रलये च तमभ्येति भास्करं दीप्तपतेजसम्।। (ब्र०–२२.१.१३)
[१४] सर्व्वात्मा सर्व्वलोकेशो देवदेवः प्रजापति।
सूर्य्य एव त्रिलोकस्य मूलं परमदैवतम्।। (ब्र०–२२.२३)
[१५] उतयाति सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि।
उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः।। (ऋग०–५.८१.४)
[१६] विश्वा रूपाणि प्रति मुञ्चते कविः प्रसावीद्भद्रं द्विपदे चतुष्पदे।
वि नाकमख्यत्सविता वरेण्यो नु प्रयाणमुषसो वि राजति।। (ऋग०–५.८१.२)
[१७] वसंते कपिलः सूर्य्यो ग्रीष्मे काञ्चनसन्निभः।
श्वेतो वर्षासु वर्णेन पाण्डुः शरदि भास्करः।। (ब्र० –२२.२.१२)
[१८] हेमन्ते ताम्रवर्णाभः शिशिरे लोहितो रविः।
इति वर्णाः समाख्याताः सूर्य्यस्य ऋतुसम्भवाः।। (ब्र० –२२.२.१३)
[१९] अनाद्यो लोकनाथो सौ रश्मिमाली जगत्पतिः।
मित्रत्वे च स्थितो यस्मात्तपस्तेपे द्विजोत्तमा।।
अनादिनिधनो ब्रह्मा नित्यश्चाक्षय एव च।
सष्ट्वा ससागरान द्वीपान भुवनानि चतुदर्शः।। (ब्र० –२२.१.२४)
[२०] इन्द्र धाताथ पर्जन्यस्त्वष्टा पूषार्य्यमा भगः।
विवस्वान विष्णुरंशश्च वरूणो मित्र एव च।। (ब्र० –२१.१.२६)
[२१] तस्य या प्रथमा मूर्त्तिरादित्यस्येन्द्रसंज्ञिता।
स्थिता सा देव राजत्वे देवानां रिपुनाशिनी।। (ब्र० –२१.१.२८)
[२२] आ त्वेता निषीदतेन्द्रमभि प्र गायत। सखाय स्तोम बाहसः।। (ऋग०–१.६.१)
[२३] द्वितीया तस्य या मूर्त्तिर्नाम्ना धातेति कीर्तिता।
स्थिता प्रजापतित्वेन विविधा सजते प्रजाः।। (ब्र० –२२.१.२९)
[२४] अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास।
कनिकदद्वषभो जीरदानू रेतो दधात्योषधीषु गर्भम्।। (ऋग० –५.८३.१)
[२५] प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः।
इरा विश्ववस्मै भुवनाय जायते यत्पर्जन्यः पथिवीं रेतसावति।। (ऋग० –५.८३.४)
[२६] स रेतोधा वषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च।
तन्म ऋतुं पातु शतशारदाय यूयं पात स्वतिभिः सदा नः।। (ऋग० –७.१०१.६)
[२७] ततीयार्कस्य या मूर्तिः पर्जन्य इति विश्रुता।
मेघेष्वेव स्थिता सा तु वर्षते च गभस्तिभिः।। (ब्र० –२२.१.३०)

[२८] चतुर्थी तस्य या मूर्त्तिर्नाम्ना त्वष्टेति विश्रुता।
स्थिता वनस्पतौ सा तु औषधीषु च सव्वतः।। (ब्र० –२२.१.३२)
[२९] प्रति नः स्तोमं त्वष्टा जुषते स्यादस्मे अश्मतिर्वसूयः। (ऋग० –७.३४.२१)
[३०] वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो विद्धातु रायः। (ऋग०–७.३४.२२)
[३१] वयमुत्व पथस्सते रथं न वाज सातये। धिये पूषन्न युज्महि। (ऋग०–६.५३.१)
[३२] वि पथो वाजसातये चिनुहि विमधोजहि। साधन्तामुग्र नो धियः।। (ऋग०–६.५३.४)
[३३] शग्धि पूर्धि प्र यांसि च शिशीह प्रास्युदरम्। पूषान्निह क्रतुं विदः।। (ऋग०–१.४२.६)
[३४] त्वं तस्य द्वयाविनो धशंसस्य कस्य चित्। पदाभि तिष्ठ तपुषिम्।। (ऋग०–१.४२.४)
[३५] पञ्चमी तस्य या मूर्त्तिर्नाम्ना पूषेति विश्रुता।
अन्नेव्यवस्थिता सा तु प्रजां पुष्णाति नित्यशः।। (ब्र० –२२.१.३२)
[३६] मूर्त्तिः षष्ठी रवेर्या व अर्य्यमा इति विश्रुता।
वायोः संसरणा सा तु देवेष्वेव समाश्रिता।। (ब्र० –२२.१.३३)
[३७] गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुभर्यमणं ववत्याम्।। (ऋग० –७.३६.४)
[३८] भानोर्या सप्तमी मूर्त्तिर्नाम्ना भगेति विश्रुता।
भूतिष्ववस्थिता सा तु शरीरेषु च देहिनाम्।। (ब्र० –२२.१.३४)
[३९] प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधती।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह।। (ऋग० –७.४१.२)
[४०] भगप्रणेतर्भग सत्यराधो भगे मां धियमुदवा ददन्नः।
भग प्रणो जनय गोभिरश्वैर्भग नभिर्नवन्तः स्याम।। (ऋग० –७.४१.३)
[४१] मूर्त्तिर्या त्वष्टमी तस्य विवस्वानिति विश्रुता।
अग्नौ प्रतिष्ठिता सा तु पचत्यन्नं शरीरिणाम्।। (ब्र० –२२.१.३५)
[४२] नवमी चित्रभानोर्या मूर्त्तिर्विष्णुश्च नामतः।
प्रादुर्भवति सा नित्यं देवानामरिसूदनी।। (ब्र० –२२.१.३६)
[४३] तमस्य राजा वरूणस्तमष्विना क्रतुं सचन्त मारूतस्य वेधसः।
दाधार दक्षमुत्तमहर्विदं ब्रजं च विष्णुः सखिवां अपोर्णुते।। (ऋग० –१.१५६.४)
[४४] उरूं यज्ञाय चक्रधुरूलोकं जनयन्ता सूर्यमुषासमाग्निम्।
दासस्य चिद्वषशिप्रस्य माया जहनथुर्नरा पतनाज्येषु।। (ऋग० –७.६६.४)
[४५] मा वर्पो अस्मदप गूह एतद्यन्यरूपः समिथेवभूथ। (ऋग० –७.१००.६)
[४६] दशमी तस्य या मूर्त्तिरंशुमानिति विश्रुता।
वायौ प्रतिष्ठिता सा तु प्रह्लादयति वै प्रजाः।। (ब्र० –२२.१.३७)
[४७] मूर्त्तिस्त्वेकादशी भानोर्नाम्ना वरूणसंज्ञिता।
जलेष्वास्थिता सा तु प्रजां पुष्णाति नित्यशः।। (ब्र० –२२.१.३८)
[४८] दिवि क्षयन्ता रजसः पथिव्यां प्र वां धतस्य निर्णिजी ददीरन्।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त।। (ऋग० –७.६४.१)

[४९] मूर्त्तिर्या द्वादशी भानोर्नाम्ना मित्रति संज्ञिता।
लोकानां सा हितार्थाय स्थिता चन्द्रसरित्तटे।। (ब्र० –२२.१.३६)
[५०] मित्रस्य चर्षणीधतो वो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम्।। (ऋग० –३.५९.६)
[५१] अभि यो महिना दिवं मित्रो वभूव सप्रथाः। अभि श्रवेभिः पथिवीम्।। (ऋग–३.५९.७)

———ooo———